# Shri Ayodhya Panchakam

# શ્રી અયોધ્યા પઞ્ચકમ્

## Document Information

Text title : Ayodhya Panchakam

File name : ayodhyApanchakam.itx

Category : misc, panchaka, tIrthakShetra, raama

Location : doc_z_misc_general

Author : bhagIratharAmajI

Transliterated by : Prabhav Tengse

Proofread by : Prabhav Tengse

Description/comments : From Ayoddhya Darpan Part 1 by Shri Bhagiratharam

Latest update : February 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 20, 2023

*sanskritdocuments.org*

# શ્રી અયોધ્યા પઞ્ચકમ્

!! શ્રી જાનકીવલ્લભો વિજયતે !!

યાઽયોધ્યા જગતી તલેતુ મનુના વૈકુણ્ઠતો હ્યાનિતા
    યાચિત્વા નિજસૃષ્ટિપાલનપરં વૈકુણ્ઠનાથં પ્રભુમ્ ।
યા વૈ ભૂમિતલે નિધાય વિમલા ચેક્ષ્વાકવે ચાર્પિતા
    સાઽયોધ્યા પરમાત્મનો વિજયતે ધામ્નાં પરા મુક્તિદા ॥ ૧॥

યા ચક્રોપરિ રાજતે ચ સતતં વૈકુણ્ઠનાથસ્ય વૈ
    યા વૈ માનવલોકમેત્ય સકલાન્ દાત્રી સદા વાઞ્છિતાન્ ।
યા તીર્થાનિ પુનાતિ સન્તતમહો વર્વર્ત્તિ તીર્થોપરિ
    સાઽયોધ્યા પરમાત્મનો વિજયતે ધામ્નાં પરા મુક્તિદા ॥ ૨॥

યસ્યાં વૈષ્ણવ સજ્જનાઃ સુરસિકાઃ સ્વાચારનિષ્ઠાઃ સદા
    લીલા ધામ સુનામ રૂપ દયિતાઃ શ્રીરામચન્દ્રેરતાઃ ।
યસ્યાં શ્રીરઘુવંશજઃ પરિકરૈઃ સાર્દ્ધં સદા રાજતે
    સાઽયોધ્યા પરમાત્મનો વિજયતે ધામ્નાં પરા મુક્તિદા ॥ ૩॥

યસ્યાં તીર્થશતં સદા નિવસતિ હ્યાનન્દદં પાવનં
    યસ્યા દર્શન લાલસા મુનિવરા ધ્યાનેરતાઃ સર્વદા ।
યસ્યા ભૂમિ રજસ્ત્વજાદિ વિવુધા વાઞ્છન્તિ સ્વામીષ્ટદં
    સાઽયોધ્યા પરમાત્મનો વિજયતે ધામ્નાં પરા મુક્તિદા ॥ ૪॥

યસ્યાં ભાતિ પ્રમોદકાનનવરં રામસ્ય લીલાસ્થલં
    યત્ર શ્રીસરિતામ્બરા ચ સરયૂ રત્નાચલઃ શોભતે ।
ધ્યેયા બ્રહ્મમહેશવિષ્ણુમુનિભિર્હ્યઆનન્દદા સર્વદા
    સાઽયોધ્યા પરમાત્મનો વિજયતે ધામ્નાં પરા મુક્તિદા ॥ ૫॥

યઃ શ્લોકપઞ્ચકમિદં મનુજઃ પઠેત
    ધ્યાત્વાહૃદિ પ્રતિદિનં રઘુનન્દનાઙ્ઘ્રિમ્ ।
હિત્વા બહૂનિ દુરિતાનિ પુરાર્જિતાનિ

પ્રાપ્નોત્વભીષ્ટધનધર્મમથાપવર્ગમ્ ॥ ૬॥

ઇતિ બ્રહ્મચારી શ્રી ભગીરથરામજી વિરચિતં
શ્રીઅયોધ્યા પઞ્ચકં સમ્પૂર્ણમ્ ।

અયોધ્યા-દર્પણે ભાગ ૧

Encoded and proofread by Prabhav Tengse

*Shri Ayodhya Panchakam*

pdf was typeset on February 20, 2023

Please send corrections to *sanskrit@cheerful.com*